# “ संस्कृतख्रिस्टीयसाहित्यनभसि श्री-जान्-म्यूर-(John Muir)-वर्यस्य सारस्वतमवदानम् ”

**[John Muir’s Scholastic Contribution to the Sanskrit Christian Literature]**

***यादवपुर-विश्वविद्यालयस्य कलासंकायस्य संस्कृतविभागे***
***‘पिएइच्.डि.’ इत्युपाधिप्राप्तये प्रदत्तस्य गवेषणाभिसन्दर्भस्य सारः***


**अनुसन्धाता – सौम्यजित्-सेनः**

निबन्धनसंख्या – A00SA1100116
वर्षम् – 2016 - 2017

**तत्त्वावधायिका – प्रफेसर्-(ड.)-ऋता-चट्टोपाध्यायः**

भूतपूर्वा इउ.जि.सि. एमेरिटास्-फेलो तथा वरिष्ठा प्राध्यापिका
संस्कृत-विभागे
यादवपुर-विश्वविद्यालयस्य



संस्कृत-विभागः
यादवपुर-विश्वविद्यालयः
कोलकाता - ७०००३२
२०२१

# “Saṁskṛtakhrisṭīyasāhityanabhasi Śrī-Jān-Myūra-(John Muir)-varyasya Sārasvatam Avadānam”

## [John Muir’s Scholastic Contribution to the Sanskrit Christian Literature]

*An Abstract of the Thesis Submitted to the Faculty of Arts of Jadavpur University*
*in Partial Fulfilment for the Award of the Degree*
*of*

**DOCTOR OF PHILOSOPHY**

**in**

**SANSKRIT**

by


**Soumyajit Sen**

Registration No.: A00SA1100116
Session: 2016 – 2017


**Under the Supervision of**


**Prof. (Dr.) Rita Chattopadhyay**

Former U.G.C. Emeritus Fellow & Retired Professor
Department of Sanskrit; Jadavpur University

Department of Sanskrit
Jadavpur University
Kolkata – 700032


2021



**John Muir**

**(05.02.1810 – 07.03.1882)**

[Photo Courtesy: Oil Painting of John Muir by John Henry Lorimer,
The University of Edinburgh, Art Collection, 1881.]

## ।। श्री-जान्-म्यूर-जीवनचर्यासारः*** ।।

- १८१० : जन्म, ग्लासगो, स्कटल्याण्डः ।
- १८२०-३ : इरभिन-अकाडेमी (विद्यालयः), आइरशायारः ।
- १८२३-६ : ग्लासगो-महाविद्यालयः (विश्वविद्यालयः), कलाविभागः ।
- १८२६-७ : इस्ट-इण्डिया-कम्पानी-प्रशिक्षण-महाविद्यालयः, हेइलीवारी ।
- १८२७ : नियुक्तिः, बङ्गीय-जानपद-सेवायाम्, इस्ट-इण्डिया-कम्पानी ।
- १८२९ : फोर्ट-उइलियाम-महाविद्यालयः, क्यालकाटा ।
- १८२९ : मुख्य-समाहर्तुः सहायकः, नदीया, अधःस्थ-बङ्गप्रदेशः ।
- १८३०-३ : मुख्य-समाहर्तुः सहायकः, फारुखावाद, उत्तर-पश्चिम-प्रदेशः ।
- १८३३-७ : सहायक-सचिवः, राजस्व-विभागः, एलाहवादः ।
- १८३७-४२ : विशिष्टायोगिकः, भूम्यनुसन्धान-विभागः, मिराटस्तथा साहारानपुरः।
- १८४२-३ : कार्यनिवृत्तिः, स्कटल्याण्ड इउरोपश्च ।
- १८४४-५ : अध्यक्षः, भिक्टोरिया-महाविद्यालयः (कुइन्स-कलेज), वाराणसी ।
- १८४५ : मुख्य-समाहर्ता, आजमगडः ।
- १८४६ : मुख्य-समाहर्ता, गोरखपुरः ।
- १८४७-९ : मुख्य-समाहर्ता, आजमगडः ।
- १८५० : मुख्य-समाहर्ता, देहली ।
- १८५०-३ : जानपदविचारकस्तथा दण्डाधिकरणिकः, फतेहपुरः ।
- १८५३ : विविक्तवृत्तिः, एडिनवार्गः ।
- १८५५ : डि. सि. एल. (अक्सफोर्ड-विश्वविद्यालयतः) ।
- १८६१ : एल. एल. डि. (एडिनवार्ग- विश्वविद्यालयतः) ।
- १८७८ : सि. आइ. इ. (भारतीय-साम्राज्य-आदेष्टा) ।
- १८८२ : तनुत्यागः, एडिनवार्गः, स्कटल्याण्डः ।

[*** तालिकेयं ड.एभ्रिल.ए.पाओयेल-वर्यया प्रणीतस्य *Scottish Orientalists and India: The Muir Brothers, Religion, Education and Empire* (२०१०) इति ग्रन्थस्य ‘Career Summaries’ इत्यंशान्मया सकार्तज्ञ्यं संगृहीता, संस्कृतेन च तामनूद्यात्र समुपस्थापिता।]

# ।। गवेषणाबन्धस्य सारः ।।

- उपोद्घातः

संस्कृतभाषा निखिलविश्वस्य वाङ्मयेषु प्राचीनतमेष्वन्यतमा सर्वदेशव्यापिका सभ्यमात्रगौरवास्पदीभूता भारतमातुर्मौलिभूता भाषा विद्यते। न केवलं भारतीयाः, वैदेशिका अपि विद्वांसः संस्कृतभाषामविनाशिनीममरीं च मन्यन्ते। तस्मादेव यदा खृष्टधर्मप्रचारकाः समाजग्मुर्भारतवर्षं, तदा तैरवगतं यद् भारतीये समाजे खृष्टधर्मस्य तथाङ्गलानां चिरस्थायिप्रभावस्य स्थापनहेतोरादावेव भारतीयसंस्कृतेस्तथा भारतीयसाहित्यानां सम्यग् ज्ञानमत्यावश्यकमिति। यतस्तदानीमपि भारतीयायाः संस्कृतेश्चिन्ताधारायाश्च प्रधानभूतमाध्यमत्वेन संस्कृतमेव सर्वैर्विद्वन्मूर्धन्यैस्तथा सामाजिकैः समस्वरेण स्वीक्रियते स्म। अतः सूक्ष्मेक्षिकया सर्वं पर्यवेक्ष्य तैः खृष्टधर्मप्रचारकैः सिद्धान्तितं यद् भारतीयचिरन्तनैतिह्यस्य मूलस्तम्भभूतस्य संस्कृतस्याध्ययनं तु नितरां प्रयोजनमिति।

भारतभूमौ स्थापितचरणानां वैदेशिकानां विशेषत आङ्गलानां प्रधानतया द्वे उद्देश्ये स्तः। प्रथमतो व्यवसायिकप्रतिष्ठा अपरतश्च खृष्टधर्मप्रचार इति। अतो ब्राह्मणैः समं समाजे प्रभावोपेता जना यदि खृष्टधर्मं प्रति मनागप्याग्रहान्विता भवेयुस्तदा साधारणजनेष्वस्य धर्मस्य प्रचारः सुतरां निरलसतयैव सम्भवपरः स्यादित्येवं विचिन्तयद्भिस्तैः प्रचारकैर्भारतीयपण्डितानां सकाशात् संस्कृताध्ययनं समारब्धम्। गच्छता कालेन भाषायामस्याञ्चाप्तव्युत्पत्तयस्ते संस्कृतभाषां द्वारीकृत्यैव खृष्टधर्मस्य प्रधानभूतानां *बाइबेला*दीनां धर्मग्रन्थानामनुवादकर्मणि कायमनोवाक्यैः प्रवृत्ता अभूवन्। न केवलमनुवाद एव स्वारसिकास्तेऽपि तु व्याकरणग्रन्थानां तथा चाभिधानग्रन्थानां रचनायामपि तेषामाग्रहः सुतरामेव वर्धित इत्यत्र नास्ति सन्देहलेशः। खृष्टधर्मस्योपजीव्यभूतानां ग्रन्थानां यथा – *Bible - Old and New Testaments - Sermon on the Mount* – इत्यादिकानां स्वल्पेनैव कालेन संस्कृतानुवादोऽपि प्रकाशितस्तैः। अत्रापि तेषां रचनाक्रिया न स्तब्धा, ते तदा तेषामिष्टभगवतो येषूखृष्टस्य पवित्रं जीवनमाश्रित्य बहूनि काव्यानि सुरगिरा विरचयामासुः। गद्यमयानां तथा च पद्यमयानां तादृशानां काव्यानां संख्या न तु स्वल्पा, नूनमेवाङ्गुल्यगण्या।

अतः संजज्ञे संस्कृतसाहित्ये नितरामनालोचितावहेलिता विस्मृतप्राया परन्त्वविस्मरणीया काचिद्धारा, सा हि – '**संस्कृतखृष्टीयसाहित्यमि**'त्यभिधयाभिधीयते।

संस्कृतवाङ्मयमिव यद्यपि संस्कृतखृष्टीयसाहित्यवपुर्न विशालं, तथापि खृष्टधर्ममाश्रित्य प्रवर्तमानेयं संस्कृतसाहित्यात्मिका मधुधारा नैकानि सहृदयहृदयानि ह्लादयितुमलमित्यत्र नास्ति काचिद्विप्रतिपत्तिः। मया समवाप्तानां तथ्यानामनुसारं न्यूनातिन्यूनतया प्रायः त्रिंशत्संख्यकानि येषूखृष्टविषयकाणि संस्कृतभाषोपनिबद्धानि काव्यानि पाश्चात्यैः प्राच्यैश्च विद्वद्भिरूनविंश-विंशशतकयोर्विरचितानि, यानि खलु निश्चयेन संस्कृतसाहित्यजगतोऽसामान्यसम्पद्रूपेण विशिष्टामेकां धारां संसर्जयन्ति जनगणमानसं च मोहयन्ति वरीवर्तन्त इत्यत्र किं चित्रम् ?

'संस्कृतखृष्टीयसाहित्यमि'ति पदेन मयका खृष्टधर्मावलम्बिभिरन्यैर्वा विद्वद्भिर्विरचितानि श्रीयेषूखृष्टविषयकाणि तद्धर्मस्यान्येषां खृष्टीयमतप्रचारकाणां वा जीविताश्रितानि संस्कृतकाव्यकुसुमानि तथा च खृष्टधर्मस्य मूलभूततत्त्वान्युपजीव्य प्रणीतानि संस्कृतकाव्यान्येव बोधयितुमिष्यन्त इत्यवधेयम्।

इत्थमिदम्प्रथमतया कवितासुरधुन्या समुपप्लावयन्तः पृथ्वीं, संवर्धयन्तोऽनेककविकुलकमलान्, विकासयन्तश्च परस्सहस्राणि सहृदयहृदयमनःकैरवाणि जेजीयन्ते संस्कृतखृष्टसाहित्यसर्जकास्ते प्राच्यपाश्चात्याः कोविदकवयोऽजरामरेण यशःकायेन।

स्कटल्याण्डदेशस्य ग्लासगोवास्तव्यानां विविधशास्त्रनिष्णातानां विमलप्रतिभानशालिहृदयानां तत्रभवतां प्रख्यातप्राच्यतत्त्वज्ञानसमृद्धानां श्रीजान्-म्यूर-पादानां ज्ञानं कीदृग् गभीरं विशालं प्रशस्तञ्चास्तीत्यत्र तत्प्रणीतानि काव्यप्रबन्धादिकान्येव साक्ष्यमावहन्तीति मन्नयः। कारयित्री-भावयित्र्योरुभययोः प्रतिभयोरसामान्याधारत्वेन जान्-म्यूर-वर्याणां विदुषां संसदि प्रकाश इत्यत्र किं चित्रम् ? तथाह्यत्र सहृदयानां मनसि प्रश्नः समुदियाद्यत्कानि तावत्काव्यानि तेन कविना प्रणीतानि, यान्यधिकृत्य गवेषणाप्रबन्धरचनायां कश्चन व्रती भवतीति। अतः समेषामनुसन्धित्सूनां सहृदयहृदयानामवगतयेऽधस्तात्तावत् प्रदीयते श्रीम्यूरपादानां समग्रेऽपि जीविते रचितानां संस्कृतकाव्यग्रन्थानां काचित्तालिका –

## ।। श्री-जान्-म्यूरस्य रचनानुक्रमणिका ।।

१. *पापमोचनीययथार्थोपायप्रदर्शनम्* – *The Inefficacy of the Ganges to Wash away Sin, With a Statement of the True Atonement*, Baptist Mission Press, Calcutta, 1840.

२. *ईश्वरोक्तशास्त्रधारा* – *The Course of Divine Revelation; A Brief Outline of the Communication of God's Will to Man and of the Evidences and Doctrines of Christianity with Allusions to Hindu Tenets*, Baptist Mission Press, Calcutta, 1846.

३. *श्रीयेषूखृष्टमाहात्म्यम्* – *The Glory of Jesus Christ; A Brief Account of Our Lord's Life and Doctrines*, Ostell and Lepage, 1848.

४. *श्रीपौलचरित्रम्* or *श्रीयेषूखृष्टप्रेरितपौलचरित्रम्* – *A Short Life of the Apostle Paul with a Summary of Christian Doctrines as Unfolded in His Epistles*, Encyclopaedia Press, 1849.

५. *मतपरीक्षा – भारतीयशास्त्रविचारात्मकः प्रथमः खण्डः, An Examination of Religions; Containing a Consideration of the Hindu Sastras*, Orphan Press, Mirzapore, 1852 (1st Ed. 1939).

*मतपरीक्षा – ख्रिस्तीयमतप्रदर्शनात्मको द्वितीयः खण्डः* – *Examination of Religions; Being an Exposition of the Evidences of Christianity for Hindus*, Bishop's College Press, Calcutta, 1854.

६. *निस्तारमार्गदीपिका* – *A Light for the Way of Salvation*. प्रकाशनकालोऽनुल्लिखितः।

७. *नूत्नोदन्तोदोत्सः* – *The Fountain of Water of Fresh Intelligence: A Description of England*, Bishop's College Press, Calcutta, 1839.

८. *शर्म्मपद्धतिः* – *The Way of True Happiness: A Sketch of the True Theory of Human Life*, Richard Watts, London, 1841.

९. *परमात्मस्तवः* – *A Christian Hymn in Sanskrit Verse and Hindee Prose*, Allahabad Mission Press, Allahabad, 1853.

१०. *मानसधर्मदीपिका* – 1840.

११. *इतिहासदीपिका* – *A Sketch* of the History of India, Bishop's College Press, Calcutta, 1840. [Based on H.H. Wilson's Manual of History and Chronology.]

१२. **व्यवहारालोकः** – *Brief Lectures on Mental Philosophy and Other Subjects delivered in Sanskrit to the Students of the Benares Sanskrit College with an Address to the Pandits and Students*, Presbyterian Mission Press, Allahabad, 1845.

१३. *श्रीविद्याचमत्कारिका* – प्रकाशनकालोऽनुल्लिखितः।

अधिगवेषणमैदम्प्राथम्येन श्रीजान्-म्यूर-प्रणीतानि खृष्टीयविषयाश्रितानि संस्कृतकाव्यानि समीक्षितानि संस्कृतालङ्कारिकदिशा। तत्रापि प्रधानतया मया तदीयं *श्रीपौलचरित्रम्* इत्याख्यं महाकाव्यं सप्रपञ्चं व्याख्याय तावकानि खृष्टीयानि संस्कृतकाव्यान्तराण्यपि विश्लेषितानीति विषयनावीन्यमेवास्य गवेषणाविषयत्वेन ग्रहणप्रयोजकमिति समीक्षकैरस्मिन् ध्यानं देयं, न तु हेयधिया त्याज्यम्।

- **गवेषणाविषयावाप्तिः**

तत्त्वावधायिकया मे प्रफेसर्-ऋता-चट्टोपाध्याय-वर्यया निर्दिष्टोऽयं गवेषणाविषयः, तयैव विषयमिममुपजीव्य गवेषणाकर्मकरणायाहमादिष्ट इति तस्यै मामकमाधमर्ण्यं सविनयं विज्ञाप्यते। नावीन्यं त्वस्य विषयस्य श्रवणमात्रमेवाधिगम्यते। तस्या एव सकाशात्समवाप्तस्य प्रख्यातयशसा श्रीसत्यव्रतशास्त्रिणा प्रणीतस्य *Modern Christian Literature in Sanskrit* इत्याख्यस्य प्रबन्धस्याध्ययनमनु संस्कृतभाषायां विरचितानां खृष्टीयकाव्यानामेका सुविस्तृता सूचिका मया प्रस्तुता। ततो बह्वन्वेषणं कृत्वा मया न्यूनातिन्यूनतया संस्कृतखृष्टीयवाङ्मयस्य प्राच्यपाश्चात्यविद्वद्भिर्विरचितानि त्रिंशत्संख्यकानि काव्यानि समवाप्तानि।

गच्छता कालेन साक्षात्कारो मे सञ्जातः प्रख्यातप्राच्यतत्त्वविदुषां स्कटल्याण्डवास्तव्यानां प्राध्यापकप्रवराणां श्री-जान्-म्यूर-वर्याणां सारस्वतकृतिभिः समम्। हृदयं मे चिन्तातल्पमञ्चति, वेगारम्भिणा विषाक्तेन शल्यशकलेन विद्धं शतधा च प्रयाति, यदा मनसि सम्यगाकलय्य विचार्यते यदेतेषां प्रकाण्डपण्डितानां म्यूर-पादानामेकमप्यपूर्वं संस्कृतकाव्यमाश्रित्याद्यावधि गवेषणादिकार्यं नैव सञ्जातमिति। केवलं Avril A. Powell-पादाभिः म्यूरभ्रातृद्वयस्य (John Muir & William Muir) मुख्यतया कर्मजीवनमाश्रित्य *Scottish Orientalists and India: The Muir Brothers, Religion,*

*Education and Empire* (२०१०) इत्याख्यं पुस्तकं निरमायीति ग्रन्थः समवाप्यते। परन्तु श्री-जान्-म्यूर-वर्याणां संस्कृतभाषानिबद्धं सम्पूर्णमपि संस्कृतखृष्टीयसाहित्यमुपजीव्याद्यावधि कश्चनाभिसन्दर्भो नैव केनचिदपि विद्वता विरचितो यत्र तेषां काव्यानां साहित्यिकं मूल्यं समीक्षितमस्तीति मे दृढा मतिः। यद्यपि म्यूरस्य *मतपरीक्षा* इति ग्रन्थमाश्रित्य प्रख्यातैतिहासिकेन श्री-रिचार्ड-फक्स-इयङ्ग-वर्येण स्वीयगवेषणाकर्म कृतमिति सश्रद्धं स स्मर्यतेऽत्र। परवर्तिनि तद्गवेषणाकार्यं *Resistant Hinduism: Sanskrit Sources on Anti-Christian Apologetics in Early Nineteenth-Century India* इति नाम्ना ग्रन्थाकारं दधद् भियेनातः १९८१-संवत्सरे प्रकाशितम्। तेनैव प्रणीतम् *The Indian Christiad: A Concise Anthology of Didactic and Devotional Literature in Early Church Sanskrit* (१९९५) इति ग्रन्थो गवेषणापरिसरेऽस्मिन् सर्वमान्यत्वं भजते।

अतो विषयवैचित्र्येण नितरामेव नूत्नोऽयं गवेषणाप्रबन्धः 'संस्कृतखृष्टीयसाहित्या'त्मिकामिमां गौरवमयीमैतिह्यधारां समेषामेव विदुषां तथानुसन्धित्सूनां च विद्यार्थिनां समक्षमवश्यं प्रकाशयेत्, येन च मुख्यतया नवनवोन्मेषशालिप्रतिभावतः श्री-म्यूर-वर्यस्य तथा चान्येषामपि संस्कृतखृष्टीयसाहित्यस्रष्टॄणां कविकलापानां नाम विश्वसाहित्यचित्रवीथिकायां स्वर्णाक्षरैरङ्कितं स्यादिति तु सहृदयमाशासे।

- **गवेषणाबन्धस्य प्रतिपाद्यविषयाः**

    क) संस्कृतखृष्टीयसाहित्यान्तर्गतानां काव्यानां रचनोद्देश्यसमीक्षणम्।

    ख) संस्कृतखृष्टीयकाव्यानां सम्पूर्णानुक्रमणिकायाः सहृदयसमक्षं प्रस्तुतीकरणप्रयत्नः।

    ग) संस्कृतखृष्टीयसाहित्यस्य कवीनां जीवितावलोकनम्।

    घ) खृष्टीयमतान्युपजीव्य प्रणीतेषु काव्येषु ऐतिहासिकतथ्यानां याथार्थ्यविचारः।

    ङ) संस्कृतालङ्कारिकदृष्ट्या काव्यानां परीक्षणम्।

    च) काव्येषु भाषागतवैशिष्ट्यविचारः।

    छ) प्राग्भवानां संस्कृताङ्गलादिकवीनां प्रभावविमर्शः।

    ज) प्राच्यपाश्चात्यमतमालम्ब्य धर्मतत्त्वमीमांसा।

- **गवेषणायाः पारिमित्यम्**

गवेषणायाः परिमितिस्तु सुतरामेव सुचिन्तिततया संयमिता। अस्मिन् बन्धे मया केवलमेव श्री-जान्-म्यूर-वर्येण प्रणीतानां संस्कृतकाव्यकुसुमानां समीक्षणं विहितम्। अन्ये च ये खलु संस्कृतखृष्टीयसाहित्यस्य कवयः सन्ति, तेषां काव्यानामुल्लेख एव मयात्र कृतः, परं विस्तरशो व्याख्यानं नैव विहितम्। किञ्च, श्री-म्यूर-वर्यस्य समेषामपि संस्कृतकाव्यानां विचारो नैवेह सुलभः। केवलमेव तेषामेव संस्कृतकाव्यानां विमर्शनमत्र प्राप्तुं शक्यं, यानि किल खृष्टीयमतमाश्रित्यैव प्रणीतानीति विशेषः। तत्रापि मुख्यतया *श्रीपौलचरित्रम्* इति दशसर्गात्मकं महाकाव्यमाश्रित्यैव मदीयगवेषणाभिसन्दर्भस्य सम्पूर्णोऽध्याय एकः प्रवर्तितो ग्रन्थस्यास्य महत्त्वाद्विशालत्वाच्च। तत्र संस्कृतालङ्कारशास्त्रदृष्ट्या काव्यस्य महाकाव्यत्वविमर्शनं कृतमिति विशेषः। प्रसङ्गगत्या व्याकरणप्रयोगच्छन्दोऽलङ्कारादीनां महत्त्वपूर्णानां विषयाणां विश्लेषणमपि विहितम्। अपि च, अन्येषां म्यूरकविकृतानां संस्कृतखृष्टीयखण्डकाव्यानामप्यालोचनं मया विहितं समासेन संस्कृतालङ्कारिकाणां मतान्यनुसृत्यैव, यद्यपि प्रसङ्गसङ्गत्या ऐतिहासिकतथ्यसमृद्धं भाषाव्याकरणादिविषयकमालोचनमप्यत्र द्रष्टुमलम्।

- **अध्यायविन्यासः**

मामकीने गवेषणाबन्धेऽस्मिन् साकल्येन षडध्यायाश्चकासति। 'उपोद्घाता'वतरणादपि पूर्वं मया प्रकृते गवेषणाबन्धे मङ्गलाचरण-प्रास्ताविक-कार्तज्ञ्यनिवेदन-शब्दसंकेतसूचिका-चित्रवीथिकादयः केचन विषया यथाप्रसङ्गं प्रस्तुताः। समाप्तौ च 'उपसंहृतिः' इत्यत्र गवेषणाया अस्या वैशिष्ट्यानि सम्यक् प्रतिपाद्य भाव्यगवेषणावकाशविषयोऽपि विवेचितो मया।

**'उपोद्घाता'**ख्ये प्रथमाध्याय आदावेव गवेषणाबन्धस्य सारं प्रकटीकृत्य गवेषणाविषयावाप्तिविषये चर्चा कृता मया। ततश्च गवेषणाबन्धस्य नामान्वर्थ्यं समासेन प्रस्तुतं गवेषणाशीर्षकस्य प्रतिपदव्यावृत्तिपूर्वकम्। तदनु गवेषणाबन्धस्य प्रतिपाद्यविषयानेकैकशः समुल्लिख्य गवेषणापारिमित्यमपि निर्दिष्टम्। गवेषणायां साक्षात् सहायतां प्रददतां केषाञ्चन ग्रन्थानां समीक्षणमप्यत्रैव सूक्ष्मेक्षिकया विहितं मया। कया पद्धत्या गवेषणेयं पल्लवितेति विषयमपि सयत्नं विश्लिष्य वर्णविन्यासविधिरपीहैव प्रदर्शितः।

'**संस्कृतखृष्टीयसाहित्यमि**'त्युक्ते द्वितीयाध्याये कीदृक् साहित्यं मम गवेषणायामभिप्रेतमिति विषयिणी चर्चा विहिता। अत्रैव मया विस्तरशो व्याख्यातं यत्कथं पाश्चात्यविद्वद्भिरेषां काव्यानां रचनायां मनः प्रदत्तमिति। संस्कृतखृष्टीयसाहित्यस्य भाषाविषयिण्यालोचनापि कृताधिबन्धम्। तत्रापि कथं सुरवागेव तैराश्रिता, तया साकमन्यासां कासां भाषाणां व्यवहारस्तैर्विहितः कथञ्चेत्यादिविषया अपि व्याख्याताः।

किञ्च, वाङ्मयेऽस्मिन् केषां केषां काव्यानामन्तर्भुक्तिः सम्भवेति विषये चर्चा ततो मया कृता। तदर्थं मयादौ संस्कृतखृष्टीयसाहित्यस्य महाकाव्यानां, ततश्च खण्डकाव्यानां, ततश्च गद्यकाव्यानां तथा अनूदितकाव्यानाम् अन्ते च विविधकाव्यानां काचनानुक्रमणिका सुविस्तृता प्रस्तुता। अध्यायस्यान्तिमे भागे मया काव्यकृतां तेषामुल्लेखो विहितः, ये खलु समग्रमपि साहित्यमिदं सृष्टवन्तस्तथा पल्लवितवन्तः – अभारतीया भारतीया वा कवयः।

'**श्री-जान्-म्यूरः (John Muir)**' इति तृतीयेऽध्याये श्री-जान्-म्यूरस्य जन्मनः आरभ्य मृत्युपर्यन्तं सम्पूर्णमपि जीवितं सतथ्यं विवृतम्। तस्य बाल्यशिक्षातः जीवनस्य सर्वस्मिन्नपि परिसरे कुत्र कुत्र कदा कदा वा तेन शिक्षा स्वीकृता तत्सर्वमपीह प्रस्तुतम्। ततश्च कर्मजीवनविषयेऽपि एकैकं वृत्तमत्र मया वर्णितम्। म्यूरवर्य इस्ट-इण्डिया-कम्पानी इति संस्थायाः सेवकरूपेण समागतो भारतम्, विविधकाले विविधपदञ्च स्वीकृत्य सेवानिरतश्चासीत्सः। तत्सर्वमपि तथ्यं मयेह सप्रमाणं समुल्लिखितम्।

ततश्चाध्यायेऽस्मिन् श्रीम्यूरवर्यस्य सारस्वतजीवनमाश्रित्य मया चर्चा कृता। आदौ तेन प्रणीतानां संस्कृतकाव्यानां नामोल्लेखपुरःसरं तत्तत्काव्यविषये समासेनालोचना विहिता, ततश्च तेन आङ्गलभाषया प्रणीतानां ग्रन्थानां विषयः सङ्क्षेपेण समुपन्यस्तः, अन्तिमे च तद्रचितानां प्रबन्धानां नामान्युल्लिख्य तेषां विषयोऽप्यालोचितो मया।

श्री-जान्-म्यूर-प्रणीतं जगत्प्रभोर्येष्वः शिष्येष्वन्यतमस्य श्रीपौलस्य जीविताश्रितं *श्रीपौलचरित्रम्* इत्याख्यं काव्यरत्नमेकं समाश्रित्य संस्कृतालङ्कारिकदिशा समीक्षणं कर्तुहमचेष्टिष्यधिगवेषणं '***श्रीपौलचरित्रम्* – जान्-म्यूर-प्रणीतं महाकाव्यम्**' इति चतुर्थाध्याये। मया काव्यस्यास्य महाकाव्यत्वविचारः संस्कृतालङ्कारिकदृष्ट्या विस्तरेण विहितः। एवञ्च मयात्र काव्यस्यास्य गुण-रचनाशैली-छन्दोऽलङ्कार-व्याकरणगतवैशिष्ट्यादिविषयेऽपि सुतरामेव सावधानं समीक्षा विहिता

ययास्य काव्यस्य सामग्रिकं विश्लेषणं सुकरं स्यात्, संस्कृतसाहित्ये विशेषतया संस्कृतखृष्टीयसाहित्ये काव्यस्यास्य गुणमानमपि निर्धारितं भवेत्।

विविधशास्त्रनिष्णातानां विमलप्रतिभानशालिहृदयानां तत्रभवतां प्रख्यातप्राच्यतत्त्वज्ञानसमृद्धानां श्रीजान्-म्यूर-पादानां ज्ञानं कीदृग् गभीरं विशालं प्रशस्तञ्चास्तीत्यत्र तत्प्रणीतानि प्रायः त्रयोदशसङ्ख्यकानि संस्कृतगिरा प्रणीतानि काव्यान्येव साक्ष्यमावहन्तीति मन्नयः। तथाहि **'श्री-जान्-म्यूर-प्रणीतानां संस्कृतखृष्टीयकाव्यान्तराणां समीक्षा'** इत्याख्ये पञ्चमाध्यायेऽस्मिन् *श्रीयेषूखृष्टमाहात्म्य – मतपरीक्षा – पापमोचनीययथार्थोपायप्रदर्शन – शर्म्मपद्धति – निस्तारमार्गदीपिका* – आख्यानां पञ्चानां खृष्टीयमतपल्लवितानां संस्कृतकाव्यानां सूक्ष्मेक्षिकया विमृष्टिरिह विहिता मया संस्कृतालङ्कारिकदिशा तथा च धर्मतत्त्वगतदिशा।

**'जान्-म्यूर-कृतं संस्कृतसाहित्यम् - सामग्रिकं मूल्यायनम्'** इति षष्ठाध्याये प्राथम्येन म्यूरमतेन धर्मतत्त्वमीमांसा सविस्तरं पल्लविता। तत्र खृष्टधर्मेण समं भारतीयसनातनधर्मस्य तुलनात्मकमालोचनमपि स्थानं प्राप्तम्। ततश्च प्राग्भूतानां कवीनां प्रभावोऽपीह यथासाध्यं स्पष्टीकृत इत्यस्या गवेषणायाः काचन विशिष्टा दिक्, यत्र कवीनां शास्त्रकाराणां वा मिथः चेतःसाम्यं क्वचिद्वा वैमत्यमपि नूनमेव ज्ञातुं शक्यते। तदनु श्री-जान्-म्यूरस्य जीवनदर्शनस्य विविधा दिशः सुष्ठु प्रतिपादनपुरःसरं प्रायः सर्वेष्वेव शास्त्रेषु तस्य दाक्ष्यमपि शोधबन्धेऽस्मिन् प्रकाशितम्।

गवेषणाबन्धस्यान्तिमे परिशिष्टाख्यांशो मया चतुर्धा विभक्तः। आदौ श्रीजान्-म्यूर-वर्यस्य सम्पूर्णा काचन वंशतालिका मयात्र प्रस्तुता। ततश्च द्वितीये भागे म्यूरकवेः काव्यग्रन्थेभ्यः सुभाषितानि सङ्गृह्य कश्चन सुभाषितरत्नकोशः प्रस्तुतः। तृतीये च विविधानां पारिभाषिकशब्दानामपि काचन तालिका प्रदत्ता। अन्तिमे कमलाकान्तविद्यालङ्कारेण प्रणीता संस्कृतखृष्टीयसाहित्यस्य प्रणेतृप्रशस्तिः साङ्गलानुवादं प्रस्तुता। गवेषणाबन्धस्यान्ते च परिशीलितानां ग्रन्थानां गवेषणाबन्धानां च काचन विस्तृतानुक्रमणिका परिवेशिता, यस्याः समवलोकनमात्रमेव संस्कृतखृष्टीयसाहित्यसम्बन्धिनां प्रायः समेषां ग्रन्थानां ज्ञानमपि भवेत्, भविष्यति गवेषणादिकर्मण्यनुसन्धातॄणां महानुपकारोऽपि जायेतेति मे सुनिश्चितः समयः।

- **पद्धतिविज्ञानम्**

समग्रेऽस्मिन् गवेषणाबन्धे विश्लेषणात्मिका विवरणात्मिका तथा च तुलनात्मिका व्याख्यानरीतिः सावधानमनुसृता। तत्रादौ श्री-जान्-म्यूर-वर्यस्य संस्कृतकाव्यानां विश्लेषणात्मिका समीक्षा मया कृता संस्कृतालङ्कारिकाणां नयानुसारेण। ततश्च तत्र विद्यमानानां तथ्यानां तथा च धर्मीयतत्त्वानां विवरणात्मिका व्याख्या विहिता। तदनु च भारतीयसनातनधर्मीयतत्त्वततिभिः साकं जान्-म्यूर-प्रोक्तानां खृष्टीयतत्त्वानां तुलनात्मिका समीक्षा मयकात्र साधिता।

मदीये सम्पूर्णेऽस्मिन् गवेषणाकर्मणि मया 'Modern Language Association' (MLA) इत्यस्य अष्टमसंस्करणभूतं (8th Edition) प्रारूपमेवानुसृतम्। परन्तु विशेषोऽयमेवात्र यत् 'परिशीलितग्रन्थानुक्रमणिका' इत्यत्र प्रकाशनस्थानस्य नाम मया प्रदत्तं, यद्यपि M.L.A. - इत्यस्य अष्टमसंस्करणानुसारं प्रकाशनस्थाननाम न प्रदीयते। अत्र कारणतया वक्तुं शक्यते यत् संस्कृतविषयस्य गवेषणायां विशेषतया मामकीन-गवेषणाया विषये प्रकाशनसंस्थानां स्थानस्य गुरुत्वमस्त्येव यतो हि ऐतिहासिकदृष्ट्या तत्स्थानं तादृशसाहित्यरचनायाः पीठस्थानत्वेन परिगण्यते। यथोदाहरणरूपेण ऊनविंशशतकस्य प्रथमार्धे संस्कृतखृष्टीयसाहित्यरचनायां कलिकाताया गुरुत्वं महनीयमासीत्, तत एव प्रायः सर्वाण्येव काव्यानि प्रकाशितान्यभवन्निति हेतोः।

अपि च, परिशीलितग्रन्थानुक्रमणिकायां संस्कृतग्रन्थानां प्राचीनानां नामोल्लेखनावसरे मया मदीयतत्त्वावधायिकाया निदेशानुसारं ग्रन्थानामकारादिक्रमेण नाम्नैव सूचिका तेषां काचन प्रस्तुता। ग्रन्थकाराणां नाम्ना ग्रन्थसूची न स्थिरीकृतेत्येव केवलमत्र विशेषः।

संस्कृतभाषया यदालिखिता तदा देवनागरीलिपिराश्रिता। तदर्थञ्च मया 'Arial Unicode MS' इत्यस्य चतुर्दशमात्रात्मको वर्णालेखाकारो (Size 14) व्यवहृतः। यदा च आङ्गलभाषया लिखिता, तदा पुनः 'Times New Roman' इत्यस्य चतुर्दशमात्रात्मको वर्णालेखाकारो (Size 14) मया प्रयुक्तः। प्रतिपृष्ठमन्ते पादटीकाः (Footnotes) मया प्रदत्ताः। द्वयोः पङ्क्त्योरन्तरा अर्धाधिकैकमात्रात्मकं (1.5 lines) व्यवधानं समग्रेऽस्मिन् गवेषणाप्रबन्धे मयानुसृतम्। किञ्च, प्रतिपृष्ठमुपरि नीचैस्तथा दक्षिणस्यां दिशि अर्धाधिकैकपरिमितं (1.5 cm) स्थानं तथा च वामपार्श्वे गवेषणासन्दर्भस्य प्रत्येकं पत्रस्य बन्धनहेतोः अर्धाधिकद्विपरिमितं (2.5 cm) स्थानं त्यक्तं मया।

- **उपसंहृतिः**

श्रीजान्-म्यूरस्य जीवितव्यापिन्याः सारस्वतसाधनाया फलं तावद् बहवो मौलिकसंस्कृतकाव्यग्रन्थाः, नैके आङ्गलभाषानिबद्धा शास्त्रीयग्रन्थाः, अनेके च प्रबन्धा, ये खल्वनाविष्कृततयैव कुत्रचिद् ग्रन्थागारेषु जराजीर्णावस्थां समाश्रयन्तोऽवहेलितास्तथानालोचिताः सन्तोऽवतिष्ठन्ते मौनमालम्ब्यैवेति ह्यस्माकं खेदकारणम्। तस्मादेवास्माभिरेतेषां जान्म्यूरवर्यैर्विरचितानां तथा च संस्कृतखृष्टीयसाहित्यं पुष्टीकुर्वतां नैकानां संस्कृतग्रन्थरत्नानामुद्धरणं तथा च तेषां गवेषणाधर्मी पाठो निष्ठासहकारं विधेयः। तेनानेक एव सहृदया गवेषकास्तथा सुधीजना उपकृता भवेयुस्तथा नूत्नस्य दिगन्तस्यैकस्योन्मोचनं स्यात्, नवारुणकिरणप्रभादीप्तस्य साहित्यप्रभातस्य चोदयो भवेदिति मे मतिर्मे दृढा।

कविः जान्-म्यूरः लोकचक्षुषामन्तरालस्थितममूल्यं रत्नमेकं, लोकचक्षुषामलक्ष्ये पतितमेकं सुगन्धि पुष्पमिति मदीयाचार्यावाचमङ्गीकृत्य वक्तुं शक्यते। सोऽयं विस्मृतो महाकविरविवाहित एव स्वतनुं तत्याज द्व्यशीत्यधिकाष्टादशशततमे (१८८२) खृष्टाब्दे स्कटल्याण्ड-देशस्य एडिनवार्ग-नगरे। पाञ्चभौतिकं देहं त्यक्त्वा यद्यपि स पारलौकिकं देहं दधार, तथापि तदीयकृतिततिना स सर्वदैव जीवन्नस्ति गवेषकाणामस्मद्दृशां चित्तेष्वित्यत्र नास्ति किमपि चित्रमित्यलमतिपल्लवितेनेति शिवम्।

- **प्रधानपदनिचयाः**

संस्कृतखृष्टीयसाहित्यम्, जान्-म्यूरः, सारस्वतम्, अवदानम् चेत्यादयः।

| | |
|---|---|
| Countersigned by the Supervisor | Signature of the Candidate |
| **Prof. (Dr.) Rita Chattopadhyay** | **Soumyajit Sen** |
| Dated: 15.04.2021 | Dated: 15.04.2021 |

Prof. Dr. Rita Chattopadhyay
Ex Emeritus Fellow & Retd. Professor
Deptartment of Sanskrit
Jadavpur University
Kolkata 700032